# योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ७३



श्रीवसिष्ठ उवाच ।

एवंविचारया दृष्ट्या द्वैतत्यागेन राघव ।

स्वभावः प्राप्यते तज्ज्ञैस्तज्ज्ञैश्चिन्तामणिर्यथा ।। १

अथेमामपरां दृष्टिं श्रृणु रामानया यथा ।

दृश्यस्यात्मानमचलं भविष्यसि च दिव्यदृक् ।। २

अहं खमहमादित्यो दिशोऽहमहमप्यधः ।

अहं दैत्या अहं देवा लोकाश्चाहमहं महः ।। ३

अहं तमोऽहमभ्राणि भूः समुद्रादिकं त्वहम् ।

रजो वायुरथाग्निश्च जगत्सर्वमिदं त्वहम् ।। ४

जगत्त्रयेऽहं सर्वत्र य आत्मैव किलास्थितः ।

कोऽहं किमन्यद्देहादि द्वित्वमेकस्य कीदृशम् ।। ५

इति निश्चयवानन्तर्भूतमात्मतया जगत् ।

पश्य हर्षविषादाभ्यां नावशः परिभूयसे ।। ६

तन्मयेऽस्मिन्किल जगत्यखिले संस्थितेऽनघ ।

किमात्मीयं परं किं स्यात्कमलेक्षण कथ्यताम् ।। ७

किं तज्ज्ञव्यतिरेकेण विद्यते यदुपागतम् ।

हर्षमेतु विषादं वा विषादे ज्ञो जगन्मयः ।। ८

अहंकारदृशावेते सात्त्विके द्वेऽतिनिर्मले ।

तत्त्वज्ञानात्प्रवर्तेते मोक्षदे पारमार्थिके ।। ९

परोऽणुः सकलातीतरूपोऽहं चेत्यहंकृतिः ।

प्रथमा सर्वमेवाहमित्यन्योक्ता रघूद्वह ।। १०

अहंकारदृगन्या तु तृतीया विद्यतेऽनघ ।

देहोऽहमिति तां विद्धि दुःखायैव न शान्तये ।। ११

अथ चैतत्त्रयमपि त्यक्त्वा सकलसिद्धये ।

यच्छेषं तदुपालम्ब्य तिष्ठावष्टब्धतत्परः ।। १२

सर्वातीतस्वरूपोऽपि सर्वसत्तातिगोऽपि च ।

असत्तापूरितजगदस्त्येवात्मा प्रकाशकः ।। १३

स्वानुभूत्यैव पश्याशु स एवासि सदोदितः ।

आशयं हृदयग्रन्थिं त्यज तत्त्वविदांवर ।। १४

नात्मास्त्यनुमया राम न चाप्तवचनादिना ।

सर्वदा सर्वथा सर्वं स प्रत्यक्षोऽनुभूतितः ।। १५

यदिदं स्पर्शनं स्पन्दं किंचिद्यत्संविदाद्यपि ।

तत्सर्वमात्मा भगवान्दृश्यदर्शनवर्जितः ।। १६

न सन्नासन्नसौ देवो नाणुर्नापि महानसौ ।

नाप्येतयोर्दृशोर्मध्यं स एवेदं च सर्वतः ।। १७

स एव चैवं वदति स च वक्तुं न युज्यते ।

न तदन्यदिदं तात पश्यात्मानमनामयम् ।। १८

नात्मायमयमप्यात्मा संज्ञाभेद इति स्वयम् ।

तेनैव सर्वगतया शक्त्या स्वात्मनि कल्पितः ।। १९

संस्थितः स हि सर्वत्र त्रिषु कालेषु भास्करः ।

सूक्ष्मत्वात्सुमहत्त्वाच्च केवलं न विभाव्यते ।। २०

सत्स्वनन्तपदार्थेषु जीवत्वेनाभिबिम्बति ।

आत्मा पुर्यष्टकादर्शे स्वभाववशतः स्वतः ।। २१

पुर्यष्टकोदयादेव स्वयमात्मानुभूयते ।

सर्वदा सर्वसंस्थः खे घनास्पन्दादिवानिलः ।। २२

चिदात्मा सर्वगो व्यापी न क्वचिन्नाम संस्थितः ।

यद्वत्सर्वपदार्थानां सत्ता तद्वन्महेश्वरः ।। २३

सति पुर्यष्टके तस्मिञ्जीवः स्फुरति नोपले ।

सति वायाविव रजः सति दीप इवेक्षणम् ।। २४

इयं पुर्यष्टके स्वेच्छा स्वात्मन्येवात्मनि स्थिते ।

सति स्फुरत्यभ्युदिते भानाविव जनैषणा ।। २५

यदि सूर्ये स्थिते व्योम्नि तादृशोचितसंस्थितिः ।

नश्यति व्यवहारोऽयं भास्करे तत्किमागतम् ।। २६

यद्यात्मनि स्थिते देवे तत्सत्ता लब्धसंस्थितिः ।

देहो नाशमुपायाति तत्किं नष्टमिहात्मनि ।। २७

न जायते न म्रियते नादत्ते नाभिवाञ्छति ।

न मुक्तो न च बद्धोऽयमात्मा सर्वस्य सर्वदा ।। २८

आत्माप्रबोधाभ्युदिता निरात्मन्यात्मतां गता ।

सर्परज्जुभ्रमाकारा भ्रान्तिर्दुःखाय केवलम् ।। २९

अनादित्वान्न जातोऽयमजातत्वान्न नश्यति ।

आत्मात्मव्यतिरिक्तं तु नाभिवाञ्छत्यसंभवात्।। ३०

दिक्कालाद्यनवच्छेदान्न बद्धोऽयं कदाचन ।

बन्धाभावे क्व मुक्तिः स्यादमोक्षस्तेन संस्थितः ।। ३१

एवंगुणविशिष्टोऽयमात्मा सर्वस्य राघव ।

अविचारवशान्मूढो लोकोऽयं परिरोदिति ।। ३२

सम्यगालोकिताशेषपूर्वापरजगत्क्रमः ।

मा शोकं गच्छ सुमते मौर्ख्योपगतलोकवत् ।। ३३

द्वे एव कलने त्यक्त्वा मोक्षबन्धात्मिके यथा ।

विदुषा व्यवहर्तव्यं यन्त्रणेवात्ममौनिना ।। ३४

न मोक्षो नभसः पृष्ठे न पाताले न भूतले ।

मोक्षो हि चेतो विमलं सम्यग्ज्ञानविबोधितम् ।। ३५

सकलाशास्वसंसक्त्या यत्स्वयं चेतसः क्षयः ।

स मोक्षनाम्ना कथितस्तत्त्वज्ञैरात्मदर्शिभिः ।। ३६

यावत्प्रबोधो विमलो नोदितस्तावदेव सः ।

मौर्ख्याद्दीनतया राम भक्त्या मोक्षोभिवाञ्छ्यते ।।३७

परं प्रबोधमासाद्य चित्ते चित्तत्त्वतां गते ।

दश मोक्षा न वाञ्छ्यन्ते किमुतैको हि मोक्षकः ।। ३८

अयं मोक्षस्त्वयं बन्धः पेलवां कलनामिति ।

परित्यज्य महात्यागी स त्वमेव भवाभव ।। ३९

परिगलितविकल्पनां प्रयातः

सगरसुतौघनिखातमेखलाङ्कम् ।

अवनिवलयमन्तरस्तसङ्ग-

श्चिरमनुपालय सर्वदोदितश्रीः ।। ४०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे स्वात्मविचारो नाम त्रिसप्ततितमः सर्गः ।।

७३ ।।